International Journal of Sanskrit Research 2024; 10(4): 155-158

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 155-158
© 2024 IJSR
www.anantaajournal.com
Received: 18-05-2024
Accepted: 21-06-2024

**गुरुपद रायः**
शोधच्छात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आन्ध्रप्रदेश, भारत

**Corresponding Author:**
**गुरुपद रायः**
शोधच्छात्रः, साहित्यविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः, आन्ध्रप्रदेश, भारत

# डॉ. वीरेन्द्रकुमारभट्टाचार्येण विरचितशार्दूलशकटरूपकस्य प्राकरणिकमीमांसा

## गुरुपद रायः

## सारांश

संस्कृतसाहित्ये काव्यानां प्रतिपत्तिः प्राच्यपाश्चात्यविदुषामत्यन्तप्रियत्वाल्लौकिकसंस्कृतसाहित्ये नैकानि काव्यानि प्रथितानि सन्ति। काव्यस्य दृश्यश्रव्यत्वभेदेन दृश्यस्य रूपकत्वं तत्रापि दशविधरूपकं नाटकप्रकरणादीनि लोके बहुधा आदृतानि सन्ति। तदर्थं काव्येषु नाटकं रम्यमिति रूपकस्य श्रेष्ठता काव्यसमालोचकैस्तावदालोचिता वर्तते। प्रो. वीरेन्द्रकुमारभट्टाचार्येण विरचितशार्दूलशकटरूपकस्य नाटकलक्षणान्यविद्यमानानि विद्यन्ते। तदर्थं नाटकस्य कानिचिदेव लक्षणान्यत्र प्रतिभान्ति परन्तु प्रकरणस्य सम्पूर्णलक्षणमत्र प्राप्यते तदर्थमिदं रूपकं प्रकरणमिति बहुधा आलङ्कारिकैस्तावत् आद्रीयते। इदं रूपकं नायिकविहीनं प्रकरणं भवति। अन्यच्च बहुषु प्रकरणेषु नायिकायाः विहीनत्वेऽपि प्रकरणत्वं न हानिरिति संस्कृतसाहित्ये प्रमाणीकृतं वर्तते। पञ्चाङ्कविशिष्टमिदं रूपकमादिशूरस्य नायकत्वं सूचयति।

**कूटशब्द** : प्राकरणिकमीमांसा, विरचितशार्दूलशकटरूपकस्य, वीरेन्द्रकुमारभट्टाचार्येण, संस्कृतसाहित्ये

## प्रस्तावना

संस्कृतसाहित्यस्याव्याहतकाव्यधारा वैदिककालात्तत्त्वदर्शिभिर्मन्त्रसिद्धमहर्षिभिस्तावत्संवादा-ख्यानो-पाख्यानादिभिर्बहुधोपदिष्टा वर्तते। तत्रस्थविषयाः उपजीव्यत्वेन काव्यसाहित्येऽभूतपूर्वरस-निर्झरीणि काव्यरसपिपासूनां मतिमारोहति चित्तः प्रासादयति हृदयं विदारयति च। तदर्थं साहित्यशास्त्रं साक्षाद्भगवत्याः श्रीशारदयाः आराधनेति बहुधोच्यते। साहित्यं विना लोके सहृदयैर्वास्तविकानन्दप्राप्तिं न भवितुमर्हति। अतः उक्तं च वर्तते –

**साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।**
**तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥**[i]

वैदिकसमाजान्तर्गतदार्शनिकचिन्तनानामाध्यात्मतत्त्वानां मावेशः काव्यसाहित्यस्योत्कर्षतां व्यावहारिकताञ्च विदधाति। तदर्थमेव लोके साहित्यस्य विविधसम्प्रदायाः विविधदृष्टिकोणा-दजायत।

पुरुरवा उर्वशी सम्वादः

यमयमीसंवादः

अगस्त्यलोपामुद्रासम्वादः

सम्वादानां साहित्यिकमूल्यबोधो बहुधा प्रमाणीकृतः साधितश्च।

### १.२ शार्दूलशकटरूपकस्य प्राकरणिकमीमांसायाः अध्ययनम्

शार्दूलशकटमिति रूपकं कवेः प्रो. वीरेन्द्रकुमारभट्टाचार्येण विरचितं वर्तते। अस्य काव्यत्वं प्रकरणत्वमत्र विचार्यते। कवेः अत्यन्तं समाजिकजनानां प्रति उत्तममार्गप्रदर्शनं कर्मकराणां प्रति सुकर्म प्रेरणमस्य काव्यस्यालोच्यप्रसङ्गो वर्तते।

### १.२.१ शार्दूलशकटरूपकस्य प्रकरणत्वम्

लोके काव्यस्याह्लादकतोत्तमकाव्यस्य विविधलक्षणान्यालङ्कारिकै-स्तावत्प्रदत्तानि विद्यन्ते। यथा विश्वनाथेनोक्तं वाक्यं रसात्मकं काव्यं, मम्मटेन तददोषौ शब्दार्थौ सगुणावनलङ्कृतौ पुनः क्वापि[ii], अलङ्कारसम्प्रदायस्य प्रवर्तकभामहाचार्येण शब्दार्थौ सहितौ काव्यम्[iii], ननु शब्दार्थौ काव्यमिति[iv] क्षेमेन्द्रेणौचित्यरससिद्धस्य स्थिरं काव्यस्य जीवितमित्यादीनि विविधकाव्यलक्षणानि उदाहृतानि सन्ति। किमन्यत्काव्यस्यालङ्कारिकौचित्यतामपि विद-धातुमालङ्कारिकैस्तावत्काव्यस्य नैकप्रयोजनानि हेतवः भेदाश्च प्रोक्ताः सन्ति। यथोक्तं –

**चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।**
**काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥** [v]

रीतेरात्मस्थानीयत्वं प्रतिपादयितुं वामनाचार्यः शब्दार्थौ समभावितात्मनौ न परित्यज्य तत्काव्यस्य परिभाषां दर्शयति। यथा

**शब्दार्थौ च शरीररूपतया काव्यस्य।**
**गुणालङ्कार सहितौ शब्दार्थौ दोषवर्जितौ ।**
**काव्यशब्दोयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।** [vi]

एवं दृश्यकाव्ये रूपकस्य परिभाषां स्पष्टयितुं विश्वनाथेन रूपस्यारोपत्वात् तद्रूपकमिति बहुधा परिभाषा स्पष्टीकृता वर्तते। ततो दशविधत्वं रूपकत्वं समालोच्य नाटकलक्षणं प्रतिपाद्य प्रकरणस्य लक्षणमपि प्रत्यपादि। यथा-

**भवेत् प्रकरणं वृत्तं लौकिकं कविकल्पितम्।**
**शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्॥**
**सापायधर्मकामार्थपरो धीरप्रशान्तकः।**
**नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्॥**
**तेन भेदास्त्रयस्तस्य तत्रभेदस्तृतीयकः।**
**कितवद्यूतकारादिविटचेटसङ्कुलः॥** [vii]

तात्पर्यमिदमित्थमभिहितं वर्तते यत् प्रकरणस्य वृत्तान्तः लौकिकः कविकल्पितो वा भवति। तस्य प्रकरणस्य अङ्गीरसः शृङ्गारः, प्रकरणस्य नायको विप्रः अमात्यः वणिग् वा भवति। किञ्च नायको धीरोदात्तधीरप्रशान्तधीरललितधीरोद्धतादिषु धीरप्रशान्तकोट्यामायाति। नायकः प्रतिकूलपरिस्थितौ अपि धर्मार्थकामपरो भवति। प्रकरणे नायिका कुत्रचित् वेश्या कुलजा द्वयं वा कुत्रचित् भवति। नायिकाभेदेन प्रकरणमपि त्रिविधं भवति। कस्मिंश्चित् प्रकरणे नायिका कुलजा भवति। कुत्रचित् वेश्या भवति कुत्रचित् उभयमपि भवति। प्रकरणं कितवद्यूतकारादिभिः वेष्टितो भवति। नाटकवत् अत्रापि पञ्चसन्धयः भवन्ति। दशरूपके धनञ्जयः अस्य प्रकरणस्य लक्षणं निर्धारयति यत् –

**अथ प्रकरणे वृत्तमुत्पाद्यं लोकसंश्रयम्।**
**अमात्यविप्रवणिजामेकं कुर्याच्च नायकम्॥**
**धीरप्रशान्तं सापायं धर्मकामार्थतत्परम्।**
**शेषं नाटकवत्सन्धिप्रवेशकरसादिकम्॥** [viii]

अतोऽयमर्थः स्पष्टः यत्प्रकरणस्य वृत्तं लोकसंश्रयं स्यात्। लौकिकवृत्तान्तमादाय प्रकरणं प्रवर्तेत। नायकः मन्त्री ,वणिग् , ब्राह्मणो वा भवेत्। स च नायकः विविधवाधाविघ्नादीन् अपसृत्यापि अग्रे प्रसरेत्। धर्मार्थकामादिषु विरतो न भवेत्। परन्तु नाटके यथा पञ्चसन्धयः वक्ष्यन्ते तद्वत् अत्रापि पञ्चसन्धयोमुखप्रतिमुखगर्भविमर्शोपसंहृतयो भवन्ति। इमे सन्धयः सन्धयः प्रकरणे अपि वृत्तं वर्तिष्यमाणाः भविष्यन्ति। तद्वत् प्रवेशकोऽपि नाटकसंश्रितो भवेत्। अर्वाचीनालङ्कारिकराजेन्द्रमिश्रवर्याः अभिराजयशोभूषणमिति ग्रन्थे स्वीयं प्रकरणलक्षणं व्यपदिशन्ति यत् –

**वृत्तं प्रकरणादीनां यथा साहित्यदर्पणे।**
**व्यवस्थितं तथा ग्राह्यं विमतिर्नात्र कापि मे॥** [ix]

अतः साहित्यदर्पणे यथा प्रकरणस्य लक्षणं समन्वितं भवति तदत्रापि अमुना कविना परिभाषितम्। विशेषतया काव्यलक्षणसन्दर्भे प्रायशः सर्वेऽपि आलङ्कारिकाः उत्कलीयविदुषः विश्वनाथकविराजस्य लक्षणं प्रतिपादयन्ति।

शार्दूलशकटरूपके तावत् पञ्चाङ्काः विद्यन्ते। अतः नूनमेव प्रकरणस्य लक्षणं पुरस्सरमनुवर्तते। अत्र नायकः आदिशूरः प्रसिद्धो जननायको भवति। अत्र अस्य नायकत्वं काव्ये भजते। सः धर्मार्थौ सदैव सेवेते। कर्मकराणां श्रमिकजनानां प्रति अहैतुकप्रवृत्तिः तेषां प्रेरणार्थं विविधमार्गप्रदर्शनमहिंसायाः सेवनं श्रमिकाणां हिताय सदैव प्रवर्तत धर्मनिमित्तं तथा अर्थनिमित्तं प्रवृत्तिर्दर्शयति।

अत्र नायकस्य विविधानुचराः विद्यन्ते। यथा-

**विश्वनाथः रत्नाकरः निशापतिः**
**निर्माल्यः अमृतः दायुदः**
**श्यामाङ्गः इन्द्रनीलः दिवाकरः**

ततोऽन्यत् प्रकरणस्य प्रासङ्गिकविषयस्तु कविकल्पितो भवेदिति वचनानुसारमस्य प्रकरणस्य प्रासङ्गिकविषयः कविकल्पितः इति वर्ण्यते। अत्र शार्दूलशकटमिति रूपकस्य विषयवस्तुनि कविना प्रो. वीरेन्द्रकुमारभट्टाचार्येण स्वयमेव समसामयिकविषयमादाय प्रासङ्गिकजीवनमादाय निर्दिष्टानि सन्ति।

प्रकरणे नायिकायाः त्रैविध्येन प्रकरणमपि त्रिविधं भवति। परन्तु अत्र नायिकायाः सुतरामभावः परिलक्षितो भवति। नारीपात्राणि कविना न प्रयुक्तानि। केवलं विषयाधारेण अस्य प्राकरणिकत्वं भजते। अन्यच्च प्रकरणस्याङ्गीरसः शृङ्गारो भवेदिति लक्षणानुगुणमपि अस्य पूर्णतां न एति। इदं प्रकरणं वीररसः करुणरसपरिपूर्णात्मकं काव्यमेति।

उपयुक्तविवेचनायां ज्ञायते यत् कविना प्रो. वीरेन्द्रकुमारभट्टाचार्येण विरचितमिदं रूपकं प्रकरणकोट्यमायाति।

## उपयुक्तग्रन्थ सूची

१. काव्यालङ्कारसूत्राणि, डा. बेतन झा ,चौरवाम्बा संस्कृत संस्थानम्,वाराणासी २०१२
२. काव्यप्रकाशः (मम्मटः) नाग प्रकाशन संस्कृतभवननईदिल्ली , १९९७
३. काव्यालंकारसूत्रवृत्तिः (वामन) केदारनाथ शर्मा कृष्णदास अकादमी१९६९-वाराणसी ,
४. साहित्यदर्पणः - विश्वनाथ कविराजः ,प्रो. योगेश्वरदत्त शर्मा पाराशरः नाग पब्लिशर्स१६६६ संस्करणं ,
५. साहित्यदर्पणः चन्द्रकला व्याख्या आचार्य शेषराजशर्मा रेग्मी चौखम्बा कृष्णदास अकादमी२०१६-संस्करण ,वाराणासी ,
६ण शार्दूलशकटम्, प्रो. वीरेन्द्रकुमारभट्टाचार्यः, संस्कृतसाहित्यपरिषत्, कलिकाता ४, १९६९

[i] श .त्र १.१२
[ii] का .प्र .१.४
[iii] काव्या .१.१३
[iv] काव्या).रुद्रटः (२.१
[v] सा .द .१.२

[vi] काव्याः सूः वृः १.१

[vii] सा२२६-२२४.६ .द .

[viii] द४०-३९.३ .रू .

[ix] अ३८.४ .भू .य .